Shri Raghunatha Temple MSS. Library,
JAMMU

६९२८

No. ४५ ख

Title प्रयोगमुखसारः

Author वाडुउः

Extent २४ पत्र Age सं० १८३२

Subject व्याकरण

© Dharmarth Trust. Digitized By eGangotri

प्रयोगमुखसार

॥४पा

6184

E-14

© Dharmarth Trust. Digitized By eGangotri

प्रयोगमुखसार श्लो०२५२ प०१४

५

ज्ञेयं=२

॥ॐ श्रीगणेशाय नमः॥ सांबं शिवं प्रणम्यादौ वाहृदाख्येन शर्मणा॥ प्रयोगमुख्यनामाद्येः
सारमुद्धृत्य लिख्यते १ प्रयोगाभिकृताज्ञातुं कारकमादितः संज्ञया षड्विधं भेदास्त्रयोविं
शतिधा पुनः २ तत्र पंचविधः कर्ता कर्म सप्तविधं भवेत् करणं द्विविधं चैव संप्रदानं त्रि
धा मतं ३ अपादानं द्विधा चैव तथाधारश्चतुर्विधः करोति कारकं सर्वं तत्स्वातंत्र्य
विवक्षया ४ तत्र कर्तर्यभिहिते प्रथमैव विधीयते तृतीया वा यथा षष्ठी स्यात्तानभि
हिते द्विधा ५ तथा कर्मण्यभिहिते विभक्तिर्विद्धि पूर्विका अनुक्ते प्रथमां हित्वा पं
चमी सप्तमी तथा ६ तृतीया पंचमी चैव षष्ठी च करणे त्रिधा षष्ठी चतुर्थी तृती
या च संप्रदाने त्रिधा मता ७ पंचम्येव त्वपादाने वर्त्तते न ततोऽन्यथा सप्तम्येवा
धिकरणे कारकस्यैष संग्रहः ८ समासतद्धिततिङ्कृत्सु चत्वारस्त्वभिधायिकाः तत्र वा

© Dharmarth Trust. Digitized By eGangotri

प्र·सु·सा·
१

षोडाः समासः संक्षेपादष्टाविंशतिधा पुनः स नित्यानित्ययोगेन लुगलुक्त्वेन च द्विधा १०
तत्पुरुषोऽष्टधा तत्र सप्तधा कर्मधारयः सप्तधा च बहुव्रीहिर्द्विगुश्चैव द्विधा मतः ११ द्वंद्वश्च
तुर्धा ज्ञेयाव्ययीभावो द्विधा मतः तेषां पुनः समानां प्राधान्यं स्याच्चतुर्विधं ११ समानाव्ययी
भावाख्या स्त्रिविधौ स्त ल्द्वितो मतः पदानां तु समर्थानां प्रथमाद्या प्रसूयते १२ तिङां च न
व पूर्वार्द्धलादेशा च परो द्विधा परस्मैपदमाख्यातं तङानावात्मनेपदं १३ परस्मादा
त्मनो भावो वचनानि भिदा त्रिधा त्रयस्तु पुरुषा ज्ञेयाः प्रथमो मध्यमो त्तमो १४ एकद्वि
बहुसंज्ञानि पदान्येकैकशस्तिङां परस्मैकर्त्तरि ज्ञेयं न भावे नापि कर्मणि १५ आत्मने
त्रिषु विज्ञेयं भावे कर्मणि कर्त्तरि धातोरकर्मकाद्भावे प्रथमैकमुच्यते १६ सकर्मा
कर्मकाद्धातोः कर्त्तरि स्यात्तमात्मतेने यत्कर्मणि तु निर्दिष्टं वर्त्तते तत्सकर्मकात् १७

शिव·
१

नाम्नैव सन्नियोक्त्रयः प्रथमः पुरुषो भवेत् त्वं युवां यूयमित्येभिस्त्रिभिरेवं तु मध्यमः १८ अ
हमावां वयं त्वेभिरुत्तमो नान्यथा मतः अन्यथा तु प्रहासः स्यात् त्वं मन्येऽहं च मोक्ष्यसे १९ कृतस्त्रि
ष्वपि वर्त्तते भावे कर्मणि कर्त्तरि अजन्त्युटः क्तिन्घञौ भावे युन्नवड् एव च २० सकर्माक
र्मकाद्धातोः क्तो भवेद्भावकर्मणोः कृत्याश्चैव खलार्थाश्च तयोरेवानुवर्त्तिताः २१ त्रिषु गात्व
त्यर्थकादिभ्यस्तथा चैवाधिकर्मणि अकर्मकात्समुत्पन्नो वर्त्तते कर्तृभावयोः २२ उष्णादु
च्क्तवतु विच श्चैव तृन् क्विप्क्यप् च खाकनः सुणिन्यच्चश्च उरुकन्नट क्रुकुकाश्चै
व कर्त्तरि २३ भावे सोत्तरकाले ल्यप् तुमन् क्त्वाः पूर्वकालजाः कर्मणि प्रथमा ते षां द्वि
तीया तु विशेषतः २४ वर्त्तमाने संनिर्द्दिष्टयो वर्त्तते शतृशानचौ तयुत्तस्तत्संज्ञका संज्ञं च समासेनैव लिङ्गानि ॥२५॥

© Dharmarth Trust. Digitized By eGangotri

२

ग्रंथानामाशयेनाहं श्लोकानां पंचविंशतिं परार्थभारमुद्धोढुं संशयभंजवैभवे २६ तत्र
प्रथमं कारकविवर्णं तत्कारकं बोद्धा कर्तृकर्मकरणसंप्रदानापादानाधिकरणभेदात् ॥
तच्च पुनस्त्रयोविंशतिधा कर्तृकर्मकरणसंप्रदानापादानाधिकरणभेदानां मेलनात् ॥
॥ तत्र कर्तृलक्षणमुक्तं भाष्ये ॥ प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः अप्रयुक्तः
प्रयुक्तो वा स कर्ता नाम कारकः १ इति ॥ तत्र कर्तुः पंचभेदाः ॥ स्वतंत्रः १ हेतुः २ कर्म ३
अभिहितः ४ अनभिहितश्चेति ॥ क्रियासिद्धौ स्वातंत्र्येण यो विवक्षितः सः स्वतंत्रः क
र्ता १ यथा पुण्यं करोति श्राद्धः शास्त्रं पठति प्राज्ञः ॥ स्वतंत्रकर्तुः प्रयोजको हेतुकर्ता
हेतुश्चासौ कर्ता चेति ॥ यथा हितं लभंते विनीताः तान् विनीतान् हितं लम्भयमाना

शिवः
२

कर्मभूत्वा कर्ता भवति कर्मकर्ता ॥ यथा ॥ स्वयमेव छिद्यते रज्जुः । कश्चिद् रज्जुं छिनत्ति तदा रज्जुः
कर्म भवति स च रज्जुः छेदनक्रियायामानुकूल्यं भजमानः स्वयमेवात्मानं छिनत्तीति कर्मक
र्ता ॥ तिङा कर्तर्यभिहिते प्रथमैव विधीयते इति ॥ अभिहितकर्ता यथा । गंगां गच्छति धा
र्मिकः । तिङनाभिहित अनभिहितः कर्ता यथा ॥ साधुभिः परार्थः संपाद्यते इति ॥ क
र्तिमत् कर्म सप्तविधं ॥ ईप्सितमनीप्सितमीप्सितानीप्सितमकथितं तत्कर्तर्यभिहित
मनभिहितं चेति ॥ तत्र कर्तुरीप्सिततमं कर्म ॥ यथा ॥ ओदनं भुंक्ते ब्राह्मणः ॥ अनीप्सितं
यथा ॥ अहिं लंघयति बालकः ॥ ईप्सितानीप्सितं यथा ॥ पायसं भक्षयति बालकः ॥ पायसं
भक्षयन् सन् तत्पतितं रजोऽप्यभ्यवहरति ॥ अकथितं यथा ॥ अपादानादिभिर्विशेषसंज्ञाभि
र्यन्नकथितं यथा गां दोग्धि दुग्धं गोपालकः गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां च शब्द

नं=१

© Dharmarth Trust. Digitized By eGangotri

प्र॰सु॰सा॰ ३

कर्मी कर्मकारकं यथा तूनां प्रयोगे एव त्वावस्थायां यः कर्त्ता स एव ण्यन्ते न कर्म भवति तत्क
र्तृकर्म यथा ॥ गच्छति ग्रामं पथिकः ॥ तमन्यः प्रयुंक्ते गच्छ गच्छेति ॥ बुध्यति शास्त्रं शिष्यः
बोधयति शास्त्रं शिष्यमुपाध्यायः भुंक्ते भक्तं विप्रः भोजयति भक्तं विप्रं धार्मिकः पठति
वेदं विप्रः पाठयति वेदं विप्रं गुरुः आस्ते देवदत्तः आसयति देवदत्तं यज्ञदत्तः ॥ अभिहि
तं कर्म यथा ॥ घटः क्रियते देवदत्तेन अभिहिते कर्मणि प्रथमा तथानभिहिते कर्त्तरि तृ
तीया ॥ अनभिहितं कर्म यथा ॥ कटं करोति नरः अनभिहिते कर्मणि द्वितीया तथाभिहि
रि= ते कर्त्तरि प्रथमा इति ॥२॥ कतिमद्विधं करणं ॥ बाह्यमाभ्यंतरं च । यच्छरीरावयवातिरिक्तं त
द्बाह्यं ॥ यथा ॥ परशुना काष्ठं छिनत्ति कर्मकारः ॥ आभ्यंतरं यथा ॥ चक्षुषा रूपं गृह्णा
ति कामुकः ॥ क्रियासिद्धौ यत्प्रकृष्टं साधनं तत्करणसंज्ञं भवति ३ कतिमत्त्रिविधं सं

या=१

शिवः ३

प्रेरकमनुमंत्रकमनिराकर्तृकं चेति ॥ तत्र प्रेरकं यथा ॥ ब्राह्मणाय गां ददाति गृहस्थः
स हि ब्राह्मणे गां देहीति प्रेरयति ॥ अनुमंत्रकं यथा ॥ अतिथये फलमूलं ददाति तपोधनः
स हि अतिथिं फलमूलं दातुं तं न प्रेरयति तेन च दीयमानमनुमन्यते ॥ अनिराकर्तृकं य
था ॥ चैत्राय पुष्पं ददात्युपासकः स हि चैत्र एतद्धारको देवः पुष्पमादातुं न तं प्रेरयति
तेन च दीयमानं न निराकरोति ॥ कर्मणा यमभिप्रैति स संप्रदानं ॥४॥ कतिमद्द्विविधं
अपादानं चलमचलं चेति ॥ चलं यथा ॥ धावतोऽश्वात्पतितो ऽश्ववाहकः ॥ अचलं यथा ॥
ग्रामादागच्छति पथिकः ॥ अपाये साध्ये यदवधिभूतं ध्रुवं तदपादानसंज्ञं ॥ कतिमच्च
तुर्विधमधिकरणं ॥ अभिव्यापकं औपश्लेषिकं वैषयिकं सामीप्यकं चेति ॥ अभिव्याप
कं यथा ॥ तिलेषु तैलं अभिव्याप्य तैलमस्तीत्यर्थः ॥ औपश्लेषिकं यथा ॥ कटे आस्ते

© Dharmarth Trust. Digitized By eGangotri

४
५

वैषयिकं यथा ॥ वने तिष्ठति शार्दूलः वनं विषयीकृत्य तिष्ठतीत्यर्थः ॥ सामीपकं यथा ॥ गंगा
यां घोषः प्रतिवसति गंगासामीपे घोषः प्रतिवसतीत्यर्थः ॥ कर्तृकर्मणोः क्रियायां य आ
धारः सोऽधिकरणसंज्ञो भवति ॥ सिद्धांतरमाह ॥ तत्राभिहिते कर्तरि प्रथमा यथा
कटं करोति देवदत्तः ॥ अनभिहिते कर्तरि द्वे विभक्ती तृतीया षष्ठ्यौ ॥ पच्यते ओ
दनः सूपकारेण परलोकभीतस्य सेवतयो धर्मः परलोकभीतेन वा तथा
कर्मणीति ॥ यथा ॥ अनभिहिते कर्मणि प्रथमां पंचमीं सप्तमीं हित्वा शेषाश्चतस्रो
विभक्तयः स्युः ॥ द्वितीया ग्रामं गच्छति पथिकः तृतीया पित्रा संजानीते पुत्रः पि
तरं जानातीत्यर्थः चतुर्थी ग्रामाय व्रजति साधुः भक्तया ग्रामं यातीत्यर्थः षष्ठी
कटस्य कारको देवदत्तः २ अनभिहितकरणे कारके तृतीया पंचमी षष्ठी चेति ॥

शिवः
४

तृतीया ॥ परशुना वृक्षं छिनत्ति वार्द्धिकः ॥ पंचमी स्तोकान्मुक्तः षष्ठी गुरोः शास्त्रं जानाति ३ संप्र
दाने ॥ षष्ठी चतुर्थी तृतीया चेति ॥ षष्ठी पुरुषस्य मृगश्चंद्रमसोदेयः पुरुषेण मृगः पशुः
चंद्रमसे पुरुषश्रेष्ठाय दातव्य इत्यर्थः ॥ चतुर्थी ब्राह्मणाय गां ददाति धार्मिकः ॥ तृतीया नी
च _ संप्रदाने तृतीया दास्या मालां प्रयच्छति कामुकः दास्यै मालां ददातीत्यर्थः अपादाने
कारके पंचम्येव नान्या विभक्तिः पर्वतादवरोहंति मुनयः अधिकरणे सप्तम्येव दृष्टिर्ध
तमस्ति समासतद्धिततिङ्कृतश्चत्वारोऽभिधायिकाः पदैतैः समासादिभिः कर्तृकर्मा
दयः साक्षात्संबंधमनुभवंति तदा ते अभिधायिकाः यदा नानुभवंति तदाऽनभिधायिकाः ॥
इति श्री प्रयोगमुखसारे कारकपटलः ॥१॥ संक्षेपात्समासपटलं ब्रूमः बोढा समा
सः संक्षेपात् षष्ठाविंशतिधा पुनः बोढा कथं ॥ तत्पुरुषकर्मधारयौ बहुव्रीहि द्विगुद्वंद्वौ

© Dharmarth Trust. Digitized By eGangotri

५ नित्यसमासो॰ नित्यसमासश्चेति लुक्समासो॰ लुक्समासश्चेति ॥ नित्यं यथा ॥ कुंभं करोतीति कु
म्भकारः ॥ लुक्समासो यथा ॥ कष्टमाश्रितः कष्टाश्रितः ॥ अलुक्समासो यथा ॥ कंठेकालो यस्य
सः कंठेकालः ॥ तत्राष्टधा तत्पुरुषः ॥ सप्तधा कथं ॥ प्रथमा तत्पुरुषः द्वितीया त॰ तृतीया त॰ चतुर्थी
त॰ पंचमी त॰ षष्ठी त॰ सप्तमी त॰ नञ्तत्पुरुषश्चेति ॥ प्रथमा यथा ॥ पूर्वं कायस्य पूर्वकायः
द्वितीया ॥ कृष्णमाश्रितः कृष्णाश्रितः ॥ तृतीया ॥ शंकुलया खंडः शंकुलाखंडः ॥ चतुर्थी ॥
यूपाय दारुः यूपदारुः ॥ पंचमी ॥ सिंहाद्भयं सिंहभयं ॥ षष्ठी राज्ञः पुरुषः राजपुरुषः ॥
सप्तमी ॥ अक्षेषु शौंडः अक्षशौंडः ॥ नञ्त॰ ॥ न ब्राह्मण अब्राह्मण ॥ इत्येवं तत्पुरुषो ज्ञेयः ॥ १
सप्तधा कर्मधारयः ॥ कथं ॥ विशेषणपूर्वपदः । विशेष्योत्तरपदः । विशेषणोभयपदः ३
उपमापूर्वपदः ४ उपमोत्तरपदः । ५ संभावनापूर्वपदः ६ अवधारणपूर्वपदश्चेति ७ तत्र पूर्वो

शिवः ५

प्र॰सि॰सा॰ ६

कथं ॥ एकबहुव्रीही ॥ अनेकबहुव्रीही चेति ॥ पूर्वः त्रीणि शृंगाणि समाहृतानि त्रिशृंगी १ अन्यः चतस्रो
दिशश्चतुर्दिशः ४ द्वंद्वसमासश्चतुर्धा कथं ॥ अन्वाचयः समुच्चयः इतरेतरयोगः समाहारश्चेति ॥
॥ अन्वाचयसमुच्चयोरसामर्थ्यात्समासो नास्ति ॥ अन्वाचयो यथा ॥ बटो भिक्षामट गां चानयेचै
ति । क्रमेण क्रियाद्वयसंबंधेन्वाचये समासो नास्ति परस्पर नसंबंधात् ॥ समुच्चयो यथा ॥
गामश्वं पुरुषं पशुमहरहर् नीयमानो वैवस्वतस्य तृप्तिं नो याति ॥ इतरेतरयोगो यथा ॥
धवश्च खदिरश्च धवखदिरौ ॥ समाहारो यथा ॥ शंखश्च पटहश्च शंखपटहं ५ अव्ययीभावो
द्विधा ॥ कथं ॥ नामपूर्वपदः ॥ अव्ययपूर्वपदश्चेति ॥ तत्राद्यो यथा ॥ शाकस्य मात्रा शाक
प्रति ॥ अन्यो यथा ॥ कुंभस्य समीपं उपकुंभं ६ तेषां समासानां प्राधान्यं चतुर्विधं ॥ पूर्वपदार्थ
प्रधानः उत्तरपदार्थप्रधानः उभयपदार्थप्रधानः अन्यपदार्थप्रधानश्चेति ॥ तत्राद्यो य
था ॥ प्राप्तो जीविकां प्राप्तजीविकः ॥ द्वितीयः ॥ चित्रा गावो यस्य स चित्रगुः ॥ द्वंद्वः सर्वपदार्थप्र

शिवः ६

© Dharmarth Trust. Digitized By eGangotri

यथा॥ नीलं च तदुत्पलं नीलोत्पलं॥ द्वितीयः॥ वैयाकरणश्चासौ खसूचिकश्चेति॥ स्पष्टः सन् खमा-
काशं सूचयतीत्यर्थः॥ तृतीयः॥ शीतं च तदुष्णं च शीतोष्णं॥ चतुर्थः॥ शंख इव धवलः शंखध
या=२ वलः॥ पंचमः॥ पुरुषोयं व्याघ्र इव पुरुषव्याघ्रः॥ षष्ठः॥ गुण इव बुद्धिः गुणबुद्धिः॥ सप्तमः॥ गु
६ ण इव धनं चेति॥ इत्यमेव कर्मधारयः॥२॥ सप्तधा च बहुव्रीहिः॥ द्विपदो बहुपदः संख्योत्तरप
दः संख्योभयपदः॥ सहपूर्वपदो व्यतीहारलक्षणो दिगंतलक्षणश्चेति॥ तत्र पूर्वो यथा॥ आरू-
ढो वानरो यं वृक्षं स आरूढवानरः वृक्षः १ द्वितीयः॥ पराक्रमोपार्जिताः संपदो ये महापुरुषे लभ-
वंति पराक्रमोपार्जितसंपदो महापुरुषाः २ तृ०॥ आसन्नो दशानामासन्नदशाः ३ च०॥ द्वौ वा त्र-
यो वा मानं येषां ते द्वित्राः ४ पं०॥ मूलेन सह कृंतः तरुः समूलकृंततरुः ५ ष० केशेषु केशेषु
गृहीत्वा इति युद्धं केशाकेशि॥ सप्त०॥ पूर्वस्याश्च दक्षिणस्याश्च दिशोर्यदंतरालं सेयं पू-
र्वदक्षिणा दिक्॥ दक्षिणपूर्वा दिक् च वा इत्यमेव बहुव्रीहिः॥३॥ द्विगुसमासो द्विविधो ज्ञेयः॥

कल्पप्=२
आरकू २९ ध २९ स्व ३० एय ३१ घन ३२ इत ३३ इतच् ३४ अनङ् ३५ गुण ३६ चण प् ३६
७ इष्टन् ३८ इतय ३८ तुत ३९ तरप् ४० तमप् ४१ कल्पप् ४२ देश्य ४३ देशीयर् ४४
द्वयसच् ४५ दघ्नच् ४६ मात्रच् ४७ तयप् ४८ ठकू ४९ ढङ् ५० अमी सामान्य वृत्तयो॥ ठ=३
स्तद्धिताः॥ पंचाशद्बोध्याः॥ तत्र मतुप् यथा॥ गुणो यस्यास्ति यस्मिन्वा विद्यते स गु-
णवान् पुरुषः॥ एवमन्ये॥ अथाव्यया स्तद्धिताः॥ तसिल् १ त्रल् २ द्यु ३ ना ४ दानी
५ दा ६ ह ७ अतः ८ थाल् ९ अम् १० अस्ताति ११ धसच् १२ उत १३ आचि १४ सम
सुण १५ ए १६ द्यवि १७ द्य १८ एद्युसच् १९ अतसुच् २० आति २१ दिल २२ रिष्टा-
ति २३ ल २४ एनप् २५ आच् २६ धाच् २७ आहिच् २८ धा २९ धमुञ् ३० आम्
३१ तसिल् यथा॥ यस्मादिति यतः एवमन्ये॥ इत्यव्यया स्तद्धिताः॥ अथ भावा

शिवः
७

© Dharmarth Trust. Digitized By eGangotri

यथा॥ ब्राह्मणक्षत्रियवैश्यशूद्रा द्विगुरुभयपदार्थप्रधान एव त्रिश्रृंगी बहुव्रीहिर्द्वि
पदार्थप्रधानः अन्यपदार्थप्रधानः उभयपदार्थप्रधानश्चेति २ आद्योयथा द्वेगावौ य
स्य सः द्विगुः द्वि० यथा द्वौवा त्रयोवा द्वित्राः अव्ययीभावस्तु पदप्रधान एव पूर्वपदा
7 र्थप्रधानः उत्तरपदार्थप्रधानः अन्यपदार्थप्रधानश्चेति॥३॥ आद्यो उपकुंभः द्वि॥
शाकस्यमात्राशाकप्रति॥ तृती०॥ उन्मत्तागंगायस्मिन्देशे सः उन्मत्तगंगोदेशः॥ इति
श्रीप्रयोगमुख्यसारे समासपटलः॥२॥ अधुना तद्धितपटलं ब्रूमः॥ सामान्यवृत्ति
को=७ रव्ययसंज्ञयोभाववाचकः॥ इति त्रिविधस्तद्धितः अनेकपदानां परस्परं समर्थानां प्रथ
मादेव पदात्तद्धितप्रत्ययः सामान्यवृत्तिस्तावत्॥ मतुप् १ लच् २ इलच् ३ शालच् ४ उ
लच् ५ वरच् ६ लज् ७ इनि ८ ठन् ९ विनि १० युस् ११ डिमिनि १२ आलिच् १३ आरच् १४
इनच् १५ आरकन् १६ आलुच् १७ अमर १८ वुन् १९ यज् २० अज् २१ इच २२ इड्‌ २३ क ञ् २४ ठञ् २५ ठक्ञ् २६ ठक् २७ ठञ् २८॥

त्व १ तल् २ मनिच् ३ ष्यञ् ४ यत् ५ वर्द्दरक् ७ यक् ८ अञ् ९ वुञ् १० अण्॥ ७॥
॥ इति श्रीप्रयोगमुख्यसारे तद्धितपटलसमाप्तम्॥ अथ तिङ्पटलमभिधीयते॥
तिङ्सूत्रे दशधा संज्ञा भवंति॥ प्रत्ययसंज्ञा १ विभक्तिसं २ परस्मैपदसं ३ आत्मनेप
दसंज्ञा ४ एकवचनसं ५ द्विवचनसंज्ञा ६ बहुवचनसं० ७ प्रथमपुरुषसं ८ मध्यम
पुरुषसं० ९ उत्तमपुरुषसं० १० इति अष्टादशानां तिङां विभक्तिश्चेति अनेन विभ
क्तिसंज्ञा नव पूर्वावधिंत्वादेशाव परौ द्विधा परस्मैपदमाख्यातमिति कोर्थः ति
प्तस्झि सिप्थस्थ मिप्वस्मस् नवलादेशाव परौ शतृ क्वसु नौ एवमेकादश
परस्मैपदसंज्ञिका भवंति तिङानावात्मनेपदमिति कोर्थः तङ् च आनश्च तङानौ
तङिति प्रत्याहारः शानचकानचौ च एवं एते एकादश प्रत्ययाः आत्मनेपदसंज्ञिका भवंति॥

© Dharmarth Trust. Digitized By eGangotri

प्र॰सु॰सा॰ ८

8

परस्मायात्मन इति परस्मैपदभागे आत्मनेपदभागे च वचनानि त्रिधा एकद्विबहुसंज्ञिका
नि भवंति त्रयः पुरुषाः प्रथममध्यमोत्तमा भवंति परस्मै कर्तरीति परस्मैपदं कर्तृज्ञेयं॥
न भावे नापि कर्मणि॥ उदाहरणम्॥ पचत्योदनं सूपकारः॥ आत्मने त्रिषु विज्ञेयं भावक
र्तरि कर्मणि॥ इति आत्मनेपदं त्रिषु॥ भावे कर्मणि कर्तरि च ज्ञेयं॥ नापि सर्वेभ्यो धातुभ्य
आत्मनेपदं भवति नापि मध्यमोत्तमौ नापि सर्वाणि वचनानि किंतु अकर्मकादेव धातो
रात्मनेपदप्रथमैकवचनानि भवंति॥ तद्यथा॥ स्थीयते देवदत्तेन॥ भावकर्मणोरित्यात्म
नेपदं भवति भावस्यैकत्वादेकवचनं च धातुकेन क्वचित्स्थीयते स्थीयंते इत्येव मादयः
प्रयोगाः प्रयुज्यंते सकर्माकर्मकादिति यदा आत्मनेकर्तरि तदा सकर्मकाज्ज्ञातोरात्म का=२
नेपदं भवति अकर्मकाच्च सकर्मकवत् कटं कुरुते देवदत्तः अकर्मकात्तु आस्ते दे

शिवः ८

यत्कर्मणीविकोर्थः यत्पुनरात्मनेपदं कर्मणि निर्दिष्टं तत्सकर्मकादेव धातोर्भवति नाकर्म
कात् क्रियते कटो देवदत्तेन भावकर्मणोरित्यात् नाम्नैव सह कोर्थः नामपदेन पट घटादि
ना सह प्रथमपुरुषः प्रयुज्यते न युष्मदस्मत्पदाभ्यां यथा सः राजा जयति तौ राजानौ ज
यतः ते राजानः जयंति मध्यमस्तु त्वं युवां यूयमित्येभिरिति मध्यमपुरुषः युष्मत्प
देनैव प्रयुज्यते नास्मन्नामपदाभ्यां यथा त्वं जयसि युवां जयथः यूयं जयथ उत्तम
स्तु अहं मावां वयमेभिरिति अस्मत्पदेन सहोत्तमपुरुषः प्रयोक्तव्यः ना नाम युष्मत्पदा
भ्यां यथा अहं जयामि आवां जयावः वयं जयामः अन्यथा तु प्रहासः स्यादिति कोर्थः
तत्रान्यथात्वमादयः प्रयुज्यंते यथा त्वं मन्ये ऽहं च भोक्ष्यसे इति व्यत्यये न प्रहासो भवंति
उक्तं तिङ्स्वरूपमात्रं इदानीमपि किंचित्तिङ्प्रयोगो दुर्वीरः यस्मादन्यथा न भवति
ततो विस्तरेण प्रयोगं दर्शयिष्यामः कदाचित्कर्मणि प्रथमा क्रियते कटो देवदत्तेन॥

© Dharmarth Trust. Digitized By eGangotri

प्र॰मु॰सा॰
९

कदाचित्तु षष्ठी ॥ रजकस्य रुजति रोगः ॥ रुजार्थानां इति कर्म्मणि षष्ठी । कर्त्ता विदनभिहिते कर्म्मणि
चतुर्थी । ग्रामाय व्रजति साधुः ॥ गत्यर्थेति द्वितीया चतुर्थ्यौ कर्म्मणि स्तः ॥ द्विकर्म्मणि जंतस्य पु
नः प्रयोगः कश्चिद् द्वितरेण प्रयुज्यते द्वे कर्म्मणी यस्यास्ति स द्विकर्मकः कर्म द्विविधं प्रधान
मप्रधानं चेति ॥ तत्र भाष्यकारेणवाह ॥ प्रधाने कर्मण्यभिधेये लादीनाहु द्विकर्मणः । अप्रधा
ने दुहादीनां ण्यंते कर्तुश्च कर्मणः १ अस्यायमर्थः ॥ द्विकर्मकेषु कर्म विवक्षायां तिङा प्र
धानकर्माभिधीयते तत्राभिहितत्वात् प्रथमैव भवति अप्रधाने ऽनभिहितत्वात् द्विती
यैव भवति अनभिहिते कर्त्तरि तृतीयैव भवति । उदाहरणं ॥ नीयते ऽजा ग्रामं दे
वदत्तेन ॥ अत्र लकारेण प्रधानकर्माभिहितं तेनाभिहिते कर्मणि प्रथमैव भवति ॥
अप्रधाने दुहादीनामित्ययमर्थः दुहादीनां धातूनां प्रयोगे ऽप्रधाने कर्मणि लादयः
के पुनस्ते दुहादयः । दुह्याचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ब्रुव

श्रीः
९

हरते श्चैव गत्यर्थानां तथैव च द्विकर्मकेषु ग्रहणं ण्यंते कर्तुश्च कर्मणः २ दुहिस्तावत् ।
दुह्यते गौर्दुग्धं गोपालकेन याच्यते राजा कंबलं ब्राह्मणेन रुध्यते व्रजो गां गोपालेन पृच्छ्य
ते गुरुः शास्त्रं शिष्येण भिक्ष्यते सुवर्णं ब्राह्मणेन राजा चीयते वृक्षः फलं वानरेण उच्य
ते शास्त्रं शिष्यो गुरुणा शिष्यते शास्त्रं गुरुणा शिष्यः ण्यंते कर्तुश्च कर्मण इति ण्यं
तेषु गत्यर्थादिषु ण्यंते यः कर्त्ता स ण्यंते कर्म भवति यथा ग्रामं गच्छति पथिकः
गमयति ग्रामं पथिकं देवदत्तः कर्मणि गम्यते ग्रामो देवदत्तेन अकर्मकाणां आस्ते
देवदत्तः आसयति देवदत्तं यज्ञदत्तः शेते पतिः शाययति पतिं भार्या कर्मणि
शाय्यते पतिर्भार्यया ॥ इति श्रीप्रयोगमुखसारे तिङ्पटलः ॥४॥ अधुना
कृत्पटलमभिधास्यामः ॥ तद्यथा ॥ कृतः किंषु प्रवर्त्तंते इति कोर्थः यथा ति

© Dharmarth Trust. Digitized By eGangotri

१०

यथा॥ अच् १ अप् २ ल्युट् ३ क्तिन् ४ घञ् ५ युच् ६ अप् ७ अङ् ८ एते अजादयो भावे
भवंति न कर्म कर्त्रोः ॥ अच् यथा ॥ धर्मचयः १ परिचयः २ संचयः ३ इत्यादयः प्रयो
गा अच् प्रत्ययांताः पुंसि न स्त्री क्लीबयोः ॥ अप् यथा ॥ शराणां निकरः पत्रिकरः इ
त्यादि ॥ ल्युट् यथा ॥ उंदी क्लेदने ॥ ओदनं पचनं श्रवणं हरणं करणं इत्यादि ॥
क्तिन् यथा ॥ पुण्यस्य कृतिः सुकृतिः भोजनं भुक्तिः युक्तिः इत्यादि ॥ घञ् यथा ॥
ओदनस्य पाकः मोहस्य त्यागः वस्त्रस्य रागः वेदः भेदः छेदः इत्यादि ॥ युच् यथा ॥
करस्य कारणा पादयोर्वन्दना ॥ वेदना इत्येवमादयः ॥ अप् यथा ॥ कटस्य चिकी
र्षा भारस्य जिहीर्षा ॥ अङ् यथा ॥ छिदा भिदा जरा त्रपा लज्जा क्षमे त्येवमाद
यः ॥ इदानीमितर वाक्यिनः कृत्प्रत्यया उच्यंते सकर्मकाकर्मकादिति कोर्थः ॥
यथोक्त प्रत्ययः सकर्मकेभ्यो धातुभ्यो भवति तदा कर्मणि भवति अभिहितत्वात्कर्म

हरिः ॐ

शिवः
१०

अनभिहितत्वात्कर्तरि तृतीया यथा ॥ ओदनो भुक्तो देवदत्तेन ॥ यदा पुनरकर्मकेभ्यो
धातुभ्यो विधीयते तदा भावे भवति यथा ॥ देवदत्तेन भूतं ॥ नपुंसके भावे क्त इति क्तप्र
त्ययः कृत्याश्च भवंतीत्यत आह ॥ कृत्याश्चैव खलर्थाश्च तयोरेवेति कोर्थः तयोरेव
भावकर्मणोः कृत्याः प्रत्यया खलर्थाश्च भवंति अकर्मकेभ्यो धातुभ्यो विधीय
माना भावे भवंति के पुनस्ते कृत्या उच्यंते ॥ तव्यत् १ तव्य २ अनीयर् ३ यत् ४
ण्यत् ५ क्यप् ६ केलिमर् ७ एते सप्त प्रत्ययाः कृत्याः कर्तरि वा ॥ तव्यत् यथा ॥
कर्मणि ॥ पक्तव्यः ओदनो देवदत्तस्य देवदत्तेन वा नेतव्यो भारो भावकेन भावकस्य
वा ॥ अनभिहिते कर्तरि तृतीया पक्षे कृत्यानां कर्तरि वेति षष्ठी तव्ये प्येते
निरूपाणि भवंति ॥ अनीयर् यथा ॥ ब्राह्मणेन पठनीयो वेदः ब्राह्मणस्य वा ॥
यत् यथा ॥ धेयं इत्यं देवदत्तेन देवदत्तस्य वा ॥ स्नेयं सेयं देयं हेयं ॥ ण्यत् यथा ॥

काशीधर्मे किं किंनित्ये किंकेना
हेयं भेद्यं छेद्यं भोज्यं भावे संस्कृतेषु
च विज्ञेया ॥ क्यप् यथा ॥ इति

© Dharmarth Trust. Digitized By eGangotri

अ॰मु॰सा॰
११

ग्रामो देवदत्तेन देवदत्त सुवा ॥ स्तुत्यो देवो धार्मिकेण धार्मिकस्तुवा ॥ केलिमर यथा ॥ पचेलिमा माषाः भिदेलिमानि काष्ठानि एते सर्वे प्रत्यया वाच्यलिङ्गाः ॥ खल् यथा ॥ ईषत्क्रियते ईषत्करो घटः कुलालेन ॥ कृच्छ्रेण क्रियते दुष्करो घटः कुंभकारेण सुकरः दुर्बोधः सुबोधः दुर्गमः पंथाः दुर्लभः सुलभः इत्येवमादयः ॥ युच् यथा ॥ अकृच्छ्रेण दीयते सुदानं कृच्छ्रेण दीयते दुर्दानं कुसुपानं क्तं क्तप्रत्ययो भावकर्मणोरेव विधीयते अतो विशेषं कर्मकर्तृ इत्यत आह ॥ त्रिषु गत्यर्थकादिभ्यः इति कोर्थः यः क्तप्रत्ययो गत्यर्थकादिभ्यो विधीयते पश्चात् कर्मणि विहितः स त्रिषु भावे कर्तरि कर्मणि च भवति केचित्ते गत्यर्थकादयः गत्यर्थाः अकर्मकाः श्लिष शीङ् स्था आस वस जन रुह जीर्यतयश्च तत्र

शिवः
११

कर्तरि ॥ ग्रामं गतो देवदत्तः ॥ एवमन्येभ्योपि ये गत्यर्थेभ्यः श्लिषादयो ऽकर्मकाः सोपसर्गाः सकर्मका भवंति अकर्मकेभ्यो धातुभ्यः किमुदाहरणम् ॥ कर्तरि शुष्को ह्रदः ॥ भावे शुष्कं ह्रदेन कर्मणि ह्रदेन शुष्कः सूर्येण शुष्क श्लिष कर्तरि आश्लिष्टो भर्त्तारं देवदत्तः ॥ कर्मणि आश्लिष्टो भर्त्ता देवदत्तेन ॥ भावे आश्लिष्टं देवदत्तेन ॥ शीङ् कर्तरि गुरुमुपशयितो देवदत्तः कर्मणि उपशयितो गुरुर्देवदत्तेन भावे उपशयितं देवदत्तेन ॥ स्था कर्तरि ॥ उपस्थितो गुरुं देवदत्तः ॥ कर्मणि उपस्थितो गुरुर्देवदत्तेन भावे उपस्थितं देवदत्तेन ॥ आस कर्तरि ॥ उपासितो गुरुं देवदत्तः कर्मणि उपासितो गुरुर्देवदत्तेन ॥ भावे उपासितं देवदत्तेन वस कर्तरि अधुषितो गुरुं देवदत्तः कर्मणि अधुषितो गुरुर्देवदत्तेन भावे अधुषितं देवदत्तेन ॥ जनी कर्तरि ॥ पुत्रमुपजातो देवदत्तः ॥ कर्मणि ॥ उपजातो देवदत्तेन पुत्रः ॥ भावे उपजा

© Dharmarth Trust. Digitized By eGangotri

१२

12

रुहू कर्तरि ॥ वृक्षमारूढो देवदत्तः कर्मणि आरूढो वृक्षो देवदत्तेन भावे आरूढं देवदत्तेन ॥
जष् कर्तरि वृषलीमनुजीर्णो देवदत्तः कर्मणि अनुजीर्णा वृषली देवदत्तेन भावे अनुजी
र्णं देवदत्तेन ॥ गत्यर्थकादकर्मकात् ॥ श्लिष शीङ् स्था आस वस जन रुह जीर्यति भ्यश्च
क्त कर्तृकर्मभावे प्रभुक्तः क्तप्रत्ययः कर्तृकर्मभावेषु वर्तते कर्तरि प्रभुक्त ओदनं देवदत्तेन ॥
कर्मणि प्रभुक्त ओदनो देवदत्तेन भावे प्रभुक्तमोदनं देवदत्तेन अकर्मकात्समुत्पन्न इति
कोर्थः यदा क्तप्रत्ययोऽकर्मकेभ्यो धातुभ्यो विधीयते तदा तयोरेव कर्तृभावयोरेव वर्त्त
ते कर्तरि शरदि सुप्ता नदी भावे सुप्तं नद्या के पुनः प्रत्ययाः कर्तर्येव विधीयंते न
भावकर्मणोः ॥ इष्णुच् १ क्तवतु २ विच् ३ तृन् ४ क्विप् ५ कमरच् ६ षाकन् ७ ल्यु ८
णिनि ९ अच् १० उ ११ उकञ् १२ टक् १३ उक १४ क १५ श्चैव कर्तरि इति कोर्थः एतेइ

शिवः
१२

इष्णुच् यथा ॥ पुत्रमलंकरिष्णुर्देवदत्तः पुत्रं जनिष्णुः पिता ॥ क्तवतु यथा ॥ ग्रामं गतवान् ॥
धनं दत्तवान् ॥ विच् यथा ॥ देवदत्तस्योपदाहः ॥ तृन् यथा ॥ कटं कर्त्ता देवदत्तः ॥ क्विप् यथा ॥ का
ष्ठस्पृग् देवदत्तः ॥ कमरच् यथा ॥ ओदनस्य घस्मरो देवदत्तः स्मरः भ्रमरः षाकन् यथा ॥
ओदनस्य भिक्षाकः कैवराकः वराकी ॥ ल्यु यथा ॥ पुत्रस्य नंदनः रमणः ॥ णिनि यथा ॥
प्रासादस्य ग्राही देवदत्तः ॥ अच् यथा ॥ ओदनस्य पचो देवदत्तः ॥ उ यथा ॥ ग्रामं जिगमि
षुः ॥ उकञ् यथा ॥ ग्राममभिलाषुको देवदत्तः पातुकः स्थायुकः भावुकः इत्यादयः ॥
टक् यथा ॥ कुरुषु चरतीति कुरुचरः मद्रचरः खेचरः ॥ उक यथा ॥ मंडुपः ॥ मधुपः ॥
क यथा ॥ गां ददातीति गोदः ॥ मोक्षदः गंगाद्विपः अंबुधः ॥ भावे सोत्तरेति ल्यप् तुमुन्
क्त्वा इमे प्रत्ययाः पूर्वकालजाः सोत्तरकालजाश्च भाव एव भवंति न कर्तृकर्मणोः ॥

© Dharmarth Trust. Digitized By eGangotri

प्र॰ मु॰ सा॰
१३
13

कर्मणि प्रथमा तेषाभिरत्यादिकोर्थः एतेषां त्रयाणां योगे कर्मणि प्रथमा भवति विशे
षेण द्वितीया विभक्तिर्भवति ॥ उदाहरणं ॥ ल्यप् तावत् प्रकृत्य कृष्यते कटो देवदत्तेन ॥
प्रकृत्य पौर्वकालिकः । द्वितीयोदाहरणं ॥ ओदनं विभज्य भुंक्ते देवदत्तः पूर्ववदभिहिते क
र्मणि प्रथमा अनभिहिते द्वितीया ॥ तुमुन्यथा ॥ ग्रामो गंतुं तु ध्यायते ग्रामं गंतु मि
च्छति जनः ॥ क्त्वा यथा ॥ कटः कृत्वा इष्यते नरेण वर्तमाने संनिर्देश्या विति कोर्थः
शतृ शानचौ प्रत्ययौ संनिर्देश्यौ सत्संज्ञकौ वर्तमानकाले वर्तेते भगन इत्यर्थः शतृ प्रत्ययः
कर्तृकारके भवति शानच् प्रत्ययस्तु त्रिषु कर्तरि कर्मणि भावेषु शतृ तावत् कटं कु
र्वन् देवदत्तः श्लोकं पठन् शानच्यथा ॥ श्लोकं कुर्वाणस्तिष्ठति ॥ कर्मणि तावत् ॥ पठमानो

शाद॰
१३

कृयमानं कार्यं देवदत्तेन भद्रं भवति ॥ भावे भूयमानं जीव्यमानं ॥ तव्यतव्यत्तसकाभ्यां च समा
सो नैव सिध्यति न भवतीत्यर्थः । कटः कर्तव्यो देवदत्तस्येत्येव मादि ॥ शतृ यथा ॥ कट
स्य कुर्वन्नित्येव मादि ॥ शानच् । कटस्य कुर्वाण इत्येवमादि षष्ठीत्यनेन समासः
14 प्राप्तः पूरणेत्यादिना प्रतिषिध्यते ॥ इति श्री प्रयोग मुख्य सारे कृत्य पटलः ॥ छ ॥
यत्रोद्देश्य विधेयत्वं तत्रायं नियमो नहि स्यात् तदग्राजह ल्लिंगमजहद्वचनं चयत् १ भ
राम भक्तिः प्रमाणं स्यात्करुणा भाजनं हरिः मुक्तिहेतुः त्रयमियं काशी ह्यजहल्लिंगमीदृ
शं २ राम दाराश्च सीतेयं स्त्रीयमप्सरसः खलु मुक्ति गृहं राम भक्ति रजहद्वचनं त्विदं ३
ननु संबंधस्य किं न कारकत्व मिहोच्यते कारकं हि क्रियाहेतुः संबंधस्याप्रधानता ४ श्री ॥

© Dharmarth Trust. Digitized By eGangotri

नं ४५

प. मु. सा. २५

साक्षात्क्रियाभिसंबंधं कारकं हि विदुर्बुधाः स्वतंत्रस्य ध्रुव द्वाभ्यां स्यात्स्यां पचति सेवकः ५

पाचकः पठती त्यादौ यथा स्वतंत्रता भवेत् न तथा क्वापि संबंधे यथा रामस्य सेवकः ॥६॥

शुभम् ॥ श्री शारदायै नमः ॥ शुभम् ॥ श्री ॥ हयग्रीवाय नमः ॥ वागीशाय नमः ॥

सं. १९३२ फाल्गुन प्र. ६ ॥ ॥ लिखितं शालिग्रामेण ॥ जम्बूद्वीपे ॥ शुभम् ॥

श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

शुभम् ॥ शुभम् शुभम् शु भम् शुभम् ॥ श्री

श्लोकः २५॥

© Dharmarth Trust. Digitized By eGangotri